# Shri Sthanustavah

# श्रीस्थाणुस्तवः

## Document Information

Text title : sthANustavaH

File name : sthANustavaH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीस्थाणुस्तवः

अथवा त्रिमूर्तिस्तुतिः २
(शुचीन्द्रे)
अम्भोरुहस्थाय चतुर्मुखाय हंसाधिरूढाय हकारधाम्ने ।
हंसादिदेवाय हरीश्वराय अकाररूपाय नमो विधात्रे ॥ १॥

जाग्रत्स्वरूपाय जगज्जनित्रे जटाधरोद्धूतिललाटधाम्ने ।
जानाति कस्त्वन्महिमानमुक्तं जाकाररूपाय नमो विधात्रे ॥ २॥

यवान्न नैवेद्यमहाप्रियाय यज्ञप्रभोक्त्रे यजमानधाम्ने ।
यानादिरूपामलवागधीश यकाररूपाय नामे विधात्रे ॥ ३॥

ज्ञानात्परज्ञेयपरात्पराय नाथाय नाभीजलजोद्भवाय ।
ज्ञानामृतायाम्बुजधामधात्रे नकाररूपाय नमो विधात्रे ॥ ४॥

मायाजगत्सृष्टिकुतूहलाय मान्याय मार्तण्डकलाधराय ।
मनोमयाय प्रथमाय कर्त्रे मकाररूपाय नमो विधात्रे ॥ ५॥

(अजाय नम इति ब्रह्ममन्त्रगर्भाः पञ्चश्लोकाः ।)
दिव्याय पद्मासनमाधवेशरूपाय देवैरनिशं स्तुताय ।
दयार्द्रचित्ताय दिगन्तगाय नमो विरिञ्चाय जगज्जनित्रे ॥ ६॥

सूत्रात्मने सोमकलाभिपूर्णदेवाय सर्वाध्वरसत्फलाय ।
प्रकुर्वते पालनमेव नित्यं ओङ्काररूपाय नमः परस्मै ॥ ७॥

नन्दात्मजायावनतत्पराय नाकादिलोके नमतां जनानाम् ।
नागारिवाहाय फलप्रदाय नकाररूपाय नमः परस्मै ॥ ८॥

मुरान्तकायामरुमोहनाय मोक्षप्रदायात्मविदां जनानाम् ।
मोहप्रदायाखिलगोपिकानां मोकारूपाय नमः परस्मै ॥ ९॥

नारायणायाखिलनायकाय नगन्धरायाम्बुजलोचनाय ।

नागाङ्कतल्पाय नवाम्बुदाय नाकाररूपाय नमः परस्मै ॥ १०॥

रामाय राजीवविलोचनाय राधाभुजङ्गाय रतीशपित्रे ।
रात्रिञ्चराधीश्वरमर्दनाय राकाररूपाय नमः परस्मै ॥ ११॥

यमादियोगाङ्गजनप्रियाय यज्ञस्वरूपाय यतीश्वराय ।
यदूत्तमानामधिनायकाय यकाररूपाय नमः परस्मै ॥ १२॥

नन्दाय नन्दव्रजनायकाय नाभीपुटोद्भूतविधीडिताय ।
नादान्तरूपाय नृसिंहधाम्ने णाकाररूपाय नमः परस्मै ॥ १३॥

यज्ञाय यज्ञावनतत्पराय यज्ञैः समाराधितपादुकाय ।
यथार्थधाम्ने यजुषाम्प्रियाय यकार रूपाय नमः परस्मै ॥ १४॥

(ओं नमो नारायणायेति विष्णुमन्त्रगर्भाः ७-१४ श्लोकाः)
त्रिमूर्तये राजमहीरुहाय त्रिधामरूपाय सुधामयाय ।
तृणाद्यजान्तं परिपूर्णधाम्ने तीर्थस्वरूपाय नमः परस्मै ॥ १५॥

नादान्तरूपाय नभःस्थिताय ज्ञानामृतायागमवल्लभाय ।
नागेन्द्रभूषाय नगेन्द्रनित्यनकाररूपाय नमः परस्मै ॥ १६॥

माया तमोध्वंसनभास्कराय मारान्तकायामरवन्दिताय ।
मत्तेभचर्माम्बरवेष्टिताय नमो मकाराय नमः शिवाय ॥ १७॥

शिलादसूनोर्हृदि भाविताय श्रीशार्ङ्गिबाणाय पुरान्तकाय ।
शीतांशुकोटीरविराजिताय नमः शिकाराय नमः शिवाय ॥ १८॥

वामाय सद्वामकलेवराय वरप्रदायात्मविदां विशेषात् ।
वटुस्वरूपाय वटालयाय नमो वकाराय नमः शिवाय ॥ १९॥

यज्ञाय यज्ञेशसखाय यज्ञैरिज्याय पूर्णाय यमान्तकाय ।
यज्ञप्रहर्त्रेऽखिलयज्ञभोक्रे नमो यकाराय नमः शिवाय ॥ २०॥

(नमः शिवायेति पञ्चाक्षरशिवमन्त्रगर्भाः १६-२० श्लोकाः ।)
नमोऽस्तु वागीशहरीश्वराय नगेन्द्रचापाय नदीधराय ।
नाम्ना शुचीन्द्रेश इति स्तुताय ज्ञानाटवीशाय नमः शिवाय ॥ २१॥

एवमात्मविदां श्रेष्ठः स्तुत्वाऽऽनन्दपरोऽभवत् ।
सर्वज्ञः शङ्कराचार्यः स्थाणुक्षेत्रे महास्थले ॥ २२॥

इति श्रीस्थाणुस्तवः त्रिमूर्तिस्तुतिश्च सम्पूर्णः ।

Proofread by PSA Easwaran

*Shri Sthanustavah*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*